## फलितज्यौतिषम् (शास्त्रिप्रतिष्ठापाठ्यक्रमद्वारा)

| Semester | NAME OF THE COURSE – (फलितज्यौतिषम्) | CREDIT | UNITS | Source | Objectives & Outcomes |
|---|---|---|---|---|---|
| 7 | DSCC-16 | 1 | जातकप्रश्नयोः भेदः, प्रश्नशास्त्रस्य अपेक्षा, दैवज्ञकर्तव्यानि, प्रच्छककर्तव्यानि, भूमिचक्रञ्च | **आधारग्रन्थः – प्रश्नमार्गः** – (१-४ अध्यायाः)<br>सहायकग्रन्थाः-<br>१.प्रश्नचण्डेश्वरः<br>२.भुवनदीपकम्<br>३.षट्पञ्चाशिका | **अस्य पाठस्य उद्देश्यानि –**<br>• ज्योतिश्शास्त्रस्य होरास्कन्धान्तर्गतस्य प्रश्नशाखायाः अध्ययनम् ।<br>• विशिष्य केरलेषु विकसितस्य प्रश्नवर्त्मनः महत्त्वपरिज्ञानम् ।<br>• अष्टमङ्गलाख्यस्य प्रश्नक्रमस्य अध्ययनम् ।<br>• दैवज्ञेन ज्ञातव्यानां समयादीनां पञ्चदशानाम् अंशानां यथाविधि अवगमनम् ।<br>**फलितांशः-**<br>अस्य पत्रस्याध्ययनेन छात्रः प्रश्नकर्मणः विषये आधारभूतं ज्ञानं प्राप्नोति। जातके सत्यपि प्रश्नस्य किं प्राधान्यम्? प्रच्छक-दैवज्ञयोः कर्तव्यानि कानि ? प्रश्नार्थं शुभः कालः देशः च कः ? इडापिङ्गलासुषम्नानाडीषु श्वासगतेः चिन्तनक्रमः कः ? तद्वशात् फलानि च कानि ? इत्यादिविचाराणां स्पष्टं ज्ञानं भवति। प्रश्ने शुभाशुभशकुनवशात् फलकथने तथा राशिचक्रलेखनादिप्रश्नारम्भविधीनां निर्वहणे च छात्रः समर्थः भवति। |
| | | 1 | अष्टमङ्गलप्रश्नफलनिर्देशक्रमः, पृच्छासमये ज्ञेयानां समयादीनां विवरणं च | | |
| | | 1 | दैवज्ञस्य गृहात् निर्गमनसमयस्य लक्षणानि, दैवज्ञस्य प्रच्छकगृहं प्रति गमनमार्गेलक्षणानि च | | |
| | | 1 | दैवज्ञस्य प्रच्छकगृहप्रवेशे लक्षणानि, प्रश्नक्रिया च | | |
| | DSCC-17<br>(Total Credit-4) | 1 | ग्रहाणां दृष्टिसाधनम्, उच्चबलम्, सप्तवर्गजबलम्, युग्मायुग्मराशिनवांशबलम्, केन्द्रादिबलम्, दिग्बलं च (सोदाहरणम् अभ्यासः) | **आधारग्रन्थः- केशवीयजातकपद्धतिः**<br>सहायकग्रन्थः – श्रीपतिपद्धतिः | पूर्वं ग्रहाणां भावानां च बलं कथं भवतीति केवलं स्थूलरूपेण परिचयः प्राप्त आसीत् । परन्तु सूक्ष्मरूपेण फलनिर्धारणार्थं स्फुटं बलं गणितेन आनेतव्यमस्तीत्यतः '**केशवीयजातकपद्धतिः**' इत्ययं ग्रन्थः सम्प्रति अध्ययनाय स्थापितः वर्तते। **अस्य पाठस्य उद्देश्यानि –**<br>• गणितेन ग्रहाणां भावानां च बलसाधनक्रमज्ञानम् ।<br>• आयुर्निर्धारणार्थं दशानिर्धारणार्थं च गुणकादीनां परिज्ञानम्।<br>• आयुषः हानिः कथं भवतीति इत्यस्य विषयस्य अवधारणम्।<br>**फलितांशः-**<br>अस्याध्ययनेन छात्रः फलनिरूपणाय गणितम् अनिवार्यमिति सुस्पष्टं विजानाति। स्थानादिषु षट्सु बलेषु अपि कति प्रभेदाः भवन्ति इति ज्ञात्वा तानि बलानि साधयितुं समर्थः भवति। |
| | | 1 | कालबलम्,पक्षबलम्, त्र्यंशबलम्, वर्षेशादिबलम्, अयनबलम्, चेष्टाबलम्, नैसर्गिकबलम्, युद्धादिबलं च (सोदाहरणम् अभ्यासः) | | |
| | | 1 | भावानां त्रिविधबलसाधनम् , इष्टकष्टसाधनम्, सप्तवर्गेष्टकष्टसाधनम्, चेष्टागुणकादिसाधनं च (सोदाहरणम् अभ्यासः) | | |
| | | 1 | आश्रयगुणकसाधनम्, कर्मयोग्यगुणकसाधनम्, दायांशादिसाधनं चक्रार्धहानिश्च । (सोदाहरणम् अभ्यासः) | | |

7/07/2025